# टिळक महाराष्ट्र विद्यापीठ, पुणे

**22R**

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : मे – २०२५**

**सत्र ५ वे**

**विषयः भारतचम्पू (22R453)**

**दिनांक : १९/०५/२०२५** **गुण : ६०** **वेळ : दु. २.०० ते ४.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १. केषामपि त्रयाणां स्वभाषया अनुवादः करणीयः।** १८

१. एकदा सायमन्तगृहे निरवग्रहं निष्पतद्भिर्बाष्पैस्तरङ्गितोत्तमाङ्गमुत्सङ्गभुवि पत्युरपत्यं पुरोधाय यातुधानापराधभयानुरोधेन मन्दितं क्रन्दितमुत्सृजन्तीं कुन्ती समुपसृत्य विषादनिदानं विप्रायताक्षीमप्राक्षीत् । सापि तां कृपालुतया हृदि लगद्गदां गद्गदाक्षरमाचचक्षे ।।

२. या खलु पुरा कुरुधराधिपापराधसमेधितक्रोधेन हलधरेण निजायुधेन हठात्कर्षणशिक्षया तत्क्षणं समुत्क्षिप्तदक्षिणक्षितिभागा तदीयभुवनभूषणायमानां भोगावतीमात्मना विजेतुं भागीरथीपाथःपथेनावतीर्य कृतप्रस्थानेवाद्यापि दृश्यते।।

३. सन्तानमूलमिदमेकमपत्यमास्ते संवर्तकालसहजश्च स राक्षसेन्द्रः।
सम्भूयते च समयः क्षपया महत्या सन्तीर्यतां कथमियं सखि मे विपत्तिः।

४ मा भून्नाशो युगपदिति नो भीरुभिर्जातु पौरैः पूर्वैर्लब्ध्वावसरमसकृत्प्रार्थनाभिः प्रक्लृप्तम् ।
एकैकस्मिन्नहनि वितरत्येकमेकं पुमांसं कृत्वा तस्मै बलिमिह जनस्तुङ्गमन्नस्य राशिम् ।।

५. अथ कदाचन मृगयोपलालितहृदयो नरेश्वरोऽयमश्वे शशिश्वेततेजसि विश्वातिशायिनि रयविजितमातरिश्वनि कृताधिरोहः पार्श्वधृतविश्वकद्रुभिरनेकवागुरोपकरणानुरोधैर्योधैरनुद्रुतो मृदुभद्रविनयाभ्यां युदुमद्रतनयाभ्यामनुविद्धः सिद्धगणगणनीयमहिमवतो हिमवतोऽवजगाहे महतीमटवीतटवीथिकाम्।।

६. अष्टाङ्गयोगानवतोऽस्य राज्ञो मिष्टान्नमासीन्मृदु कन्दमूलम्।
गर्भो वनस्याजनि केलिसौधो दर्भोऽपि सिंहासनतां जगाहे।।

**प्र. २. ससंदर्भं त्रयाणां स्पष्टीकरणं लिखत।** १८

१. स्वविशिख इव कामः सोऽपि किं पञ्चधाभूत्।

२. कुर्याः वः स्मृत एव कर्मसु हरेः शक्तेरपि स्रंसनाम्।

३. निन्द्यन्ते पितृभिस्तप्तैर्निरपत्यधनः पुमान्।

४. मलिनतामनयन्त कलेवरं मदकलाः कलभा इव धूलिभिः।

५. मातृदोषादिव बहिरगदन्तरप्यन्धभावम्।

**प्र. ३.. सविस्तरम् एकं लिखत।** १४

१. पाण्डवबाल्यवर्णनम्।

२. भीमवृन्तातः।

**प्र. ४. अ) रूपपरिचयं लिखत।** ४

एतस्मै पितृभिः समीक्ष्य धार्यमाणम्

**आ) सन्धिविग्रहं कुरुत।** ३

हिमवतोऽवजगाहे निष्पतद्भिर्बाष्पैस्तरङ्गित किमभीष्टतापदे

**इ) समासानां नामनिर्देशपूर्वकं विग्रहं कुरुत।** ३

शिशुरांशुबिम्बे मुग्धजनाः तटवीथिका

----------